CLASS : 12th (Sr. Secondary) **Code No. 4305**

**Series : SS-M/2019**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **17** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नाङ्कितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति। बालको यादृशैः बालकैः सह सङ्गतिं करिष्यति तादृशः एव भविष्यति। अतः बाल्यकाले दुर्जनैः सह संङ्गतिः कदापि न करणीया। दुर्जनानां संसर्गेण बहवः हानयः भवन्ति। यथा दुर्जनसंसर्गेण मनुष्यः असद्वृतः दुर्विचारयुक्तः च भवति तस्य बुद्धिः दूषिता भवति। सः दुर्व्यसनग्रस्तो भवति, अतः तस्य शरीरं क्षीणं दुर्बलं च भवति। कीर्तिः नश्यति। अतः स्वयशोवृद्धये, ज्ञानवृद्धये, सुखस्य शान्तेश्च प्राप्तये सर्वैरपि सदा सत्सङ्गतिः करणीया, दुर्जनसङ्गतिश्च हेया।

*प्रश्नाः* – 2 × 5 = 10

(क) बाल्यकाले बालकस्योपरि कस्य प्रभावो भवति ?

(ख) कैः सह सङ्गतिः कदापि न करणीया ?

(ग) दुर्जनसंसर्गेण मानवस्य बुद्धिः कीदृशी भवति ?



downloaded from StudentSuvidha.com

ERS at StudentSuvidha.com

(घ) कदा दुर्जनैः सह सङ्गतिः कदापि न करणीया ?

(ङ) दुर्जनसंसर्गेण काः हानयः भवन्ति ?

**खण्डः 'ख'**

**(रचनात्मकं – कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया लिखत – 6

(क) स्वच्छतायाः महत्त्वम्।

(ख) मम विद्यालयः।

(ग) मम प्रियः कविः (कालिदासः)।

**खण्डः 'ग'**

**(पठित – अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। राजवचनमनुगच्छति जनो भयात्।

**अथवा**

(ख) ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावदागतस्तावद्यज्ञसमाप्तिर्जाता। राजावभृथस्नानं कृत्वा



downloaded from StudentSuvidha.com

PAPERS at StudentSuvidha.com

सर्वानर्थिजनान् परिपूर्णमनोरथानकरोत्। ब्राह्मणो राजानं दृष्ट्वा रत्नान्यर्पयित्वा प्रत्येकं तेषां गुणकथनमकथयत्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) गुर्वर्थमर्थी श्रुतपारदृश्वा
रघोः सकाशादनवाप्य कामम्।
गतो वदान्यान्तरमित्ययं मे
मा भूत्परीवादनवावतारः।।

**अथवा**

(ख) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्तयोः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) क्रूरोऽयं किन्तुर्मध्ये प्रविश्य सर्वं विनाशयति।

(ख) यो जन्म दत्तवान्, स जीवितुमधिकारमपि दत्तवान्।

(ग) कार्यं वा साधयेयम् देहं वा पातयेयम्।

(घ) विगुणः कार्षापणः, कुत्सितश्च पुत्रः
संकटे कदाचिदुपयुक्तो भवेत्।



downloaded from StudentSuvidha.com
and PAPERS at StudentSuvidha.com

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

पदे पदे दोधूयमानाः वृक्षशाखाः सम्मुखमाघ्नन्ति,

परं दृढ़संकल्पोऽयं सादी न स्वकार्याद् विरमति।

*प्रश्नाः* – $2 \times 1 = 2$

(क) पदे पदे के सम्मुखमाघ्नन्ति ?

(ख) 'स्वकार्याद्' इति पदे का विभक्तिः ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखनीयानि –

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
सः यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

*प्रश्नाः* – $2 \times 1 = 2$

(क) लोकः कम् अनुवर्तते ?

(ख) 'सः' इति पदे का विभक्तिः किं वचनञ्च ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) मया सर्वोऽपि ब्राह्मणसमूहो <u>दक्षिणया</u> तोषितः।

(ख) न <u>परिचयं</u> रक्षति।

**खण्डः 'घ'**

**(संस्कृतसाहित्यस्य-परिचयः)**

**9.** श्रीचन्द्रशेखरवर्मणः ***अथवा*** महाकवेः कालिदासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4



downloaded from StudentSuvidha.com
PAPERS at StudentSuvidha.com

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः — 4

(i) प्रबन्धमञ्जरी।

(ii) रघुवंशम्।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार - परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत — 2 × 4 = 8

(क) उपेन्द्रवज्रा (ख) मन्दाक्रान्ता

(ग) वंशस्थम् (घ) शिखरिणी

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत — 2 × 4 = 8

(क) अनुप्रासः (ख) उपमा

(ग) श्लेषः (घ) व्याजस्तुतिः

**खण्डः 'च'**

**(अनुप्रयुक्त - व्याकरणम्)**

**13.** 'गुणसन्धेः' ***अथवा*** 'विसर्गसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**14.** 'करणकारकस्य' ***अथवा*** 'अधिकरणकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2



downloaded from StudentSuvidha.com

PERS at StudentSuvidha.com

**15.** 'द्वन्द्वसमासस्य' ***अथवा*** 'अव्ययीभावसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय – वस्तुनिष्ठप्रश्नाः ]**

**16.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 6 × 1 = 6

(क) 'ह्येवंविधम्' इति पदे कः सन्धिविच्छेदः ?

(i) ह्य + एवंविधम् (ii) हि + एवंविधम्

(iii) ह्यः + एवंविधम् (iv) ह्य + एवंविधः

(ख) 'अनेजत् + एकम्' इति पदे किं सन्धिपदम् ?

(i) अनेजदेकम् (ii) अनेजत्एकम्

(iii) अनेजेकम् (iv) अनेजतेकम्

(ग) 'अन्यथेतः' इति पदे कः सन्धिः ?

(i) यण्सन्धिः (ii) गुणसन्धिः

(iii) दीर्घसन्धिः (iv) अयादिसन्धिः

(घ) 'वरतन्तुशिष्यः' इति पदे विग्रहोऽस्ति ?

(i) वरतन्तुः शिष्यः (ii) वरतन्तवः शिष्यः

(iii) वरतन्तोः शिष्यः (iv) वरतन्तवे शिष्यः

(ङ) 'अनवाप्य' इति पदे कः समासः ?

(i) अव्ययीभावः (ii) बहुव्रीहिसमासः

(iii) नञ् तत्पुरुषः (iv) द्वन्द्वसमासः

(च) 'गुणानां लुब्धाः' इति विग्रहे किं समस्तपदम् ?

(i) गुणलुब्धाः (ii) गुणाः लुब्धाः

(iii) गुणे लुब्धाः (iv) गुणालुब्धाः



StudentSuvidha.com
downloaded from
ES and PAPERS at StudentSuvidha.com

**17.** लघूत्तरात्मक प्रश्नाः – 10 × 1 = 10

(i) 'किम्' स्त्रीलिङ्गे तृतीयाविभक्तौ एकवचने रूपम् किम् ?

(ii) 'महाद्रुमेण' इति पदे का विभक्तिः ?

(iii) 'आसीत्' इति पदे कः धातुः ?

(iv) 'अकथयत्' इति पदे कः पुरुषः ?

(v) 'दत्त्वा' इति पदे कः प्रत्ययः ?

(vi) 'त्यज् + क्त्वा' अनयोः संयोगे किं रूपम् ?

(vii) 'स्वाहा' इति उपपदयोगे का विभक्तिः ?

(viii) 'दुष्कृतम्' इति पदस्य विलोमपदं किम् ?

(ix) 'विद्वान्' इति पदस्य विलोमपदं लिखत।

(x) 'पृथिवी' इति पदस्य समानार्थकपदमस्ति ?

downloaded from StudentSuvidha.com



NOTES and PAPERS at StudentSuvidha.com